National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 68-70
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

.

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# विवाहविधिः

**Dr. Markanda Nayak**

## विवाहस्य महत्त्वम्

जायमानो वै मनुष्यः ऋणत्रयेण युक्तो भूत्वा संसारं मुहुरपि प्रत्यागच्छति । तच्च ऋणत्रयं देवऋणम्, ऋषिऋणम्, पितृऋणञ्चेति। देवार्चनेन देवऋणात् वेदाध्ययनेन ऋषिऋणात् प्रजोत्पादनेन पितृऋणात् च मुक्तो भवति। तस्मात् प्रजोत्पादननिमित्तं विवाहस्य महती आवश्यकता विद्यते। विवाहस्य अपरमपि प्रयोजनं विद्यते। यथा- किमपि धर्मानुष्ठानार्थं यागादिरनुष्ठानार्थं च पत्न्याः आवश्यकता वर्तते । मनुष्यस्य प्राकृतिकसुखलाभाय विवाहस्य प्रयोजनं विद्यते।

अस्मिन् संसारे पितरः, देवाः , मानवाः कीटाः , पतङ्गाः पशुपक्षिणो जीवाः अर्थात् यावदपि प्राणीजगत् वर्तते , तत्सर्वं गृहस्थद्वारैव पाल्यते पोष्यते च । सद्गृहस्थः प्रतिदिनं पञ्चयज्ञानामनुष्ठानेन श्राद्धतर्पणविधानेन यज्ञदानादिभिः अतिथिसत्कारेण च सर्वान् विभर्ति पुष्पाणि च । शास्त्राणि वदन्ति यन्मानवः सर्वेभ्योऽन्नजलादिकं प्रदायटैव स्वयमन्नजलं गृह्णीयात् । एतस्मिन्नेव मानवस्य मङ्गलमस्ति । तदर्थमेव शास्त्रकाराः तर्पणस्य बलिवैश्वदेवस्य च विधानतं कृतवन्तः । गृहस्थाः यदि □श्रौतविधिनाऽथवा स्मार्तविधिना वा प्रतिदिनमग्निहोमं कर्तुं न शक्नुयात् तर्हि स बलिवैश्वदेवं त्ववश्यमेव कुर्यात् । वैदिकसाहित्ये विवाहोऽप्येको यज्ञ एव मन्यते । अत एव विवाहं सम्पाद्य गृहस्थजीवने प्रवेश आवश्यको मन्यते । एवमेव ऋणत्रयान्मुक्तिः विवाहं विना अस्मभवा वर्तते । स्मृतय आश्रमव्यवस्थां पूर्णतया समर्थयन्ति । ता दृढं प्रतिपादयन्ति यद् ब्रह्मचर्याश्रमानन्तरम् अनिवार्यरूपेण विवाहो विधीयते । यथा-

**चतुर्थमायुषो भागं वसित्वाद्यं गुरोः कुले।**
**द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ।।**
**वनेषु च विहृत्यैव तृतीयं भागमायुषः।**
**चतुर्थमायुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्।**

अस्मिन्नेव सन्दर्भे अपरस्याचार्यस्य वचनमस्ति यत् पत्नी धर्मार्थकामानां कारणम् । अपत्नीको नरःकर्मानर्हो भवति । कामम्, स क्षत्रियो वैश्यो वा भवेत्। यो मानव इहलोके स्वर्गा चापि सुखमभिलषन्ति, तेन गृहस्थाश्रमो नूनं सेवनीयः । सुस्पष्टमेव यत् प्राचीनकाले अकृतविवाहो हीनो मन्यते स्म। विवाहकर्म नैकैः कारणैः प्रशस्तमिति मन्यते स्म। तदानीं विवाहो वैयक्तिकमहत्त्वापेक्षया पारिवारिको विषय आसीत् । वंशमक्षुर्णं कर्तुं सन्तेतरूत्पत्तिरेव विवाहस्य प्रधानमुद्देश्यमासीत् । देवानां पितृणाञ्चर्चनम् सन्ततौ एवाश्रितमासीत् । यच्च विवाहद्वारैव प्राप्तव्यमासीत् । विवाहशब्दस्य तात्पर्यं स्त्रीपुरुषयोः सम्बन्धमात्रेणैव नास्ति अपितु तत्पश्चात् जातस्य शिशोः आत्मनिर्भरतायाः प्राप्तिं यावत्तिष्ठति। विवाहसंस्कारस्य विधौ पुत्रकामना, शिशोः जायायाश्च रक्षणम्, गार्हस्थजीवनस्य आवश्यकता, पारिवारिकजीवनस्य आदर्शश्च निहितो वर्तते।

**मनुस्मृतौ विवाहसंस्कारः-**

पुत्रलाभेन पितृणाम् ऋणात् मुक्तिः इत्यादिभिः सुभाषितैः अस्य संस्कारस्य महत्त्वम् अवगम्यते । तत्र वरेण वध्वाः पाणेः ग्रहणेन तस्याः तदायत्तीभावो व्यज्यते। आत्मनि तस्याः पादारोपेण अश्मनः इव तस्याः स्थैर्यापादनम् उद्दिष्टम् । श्रूयते हि अस्म इव त्वं स्थिरा भवेति । अपि च भर्त्रा सह तस्याः सप्तपदीक्रमणेन होमावशष्टस्य हविषः सहभोजनेन च तयोः दृढतरसख्यानुरागौ उद्दिष्यौ। वैवाहिक्यां क्रियायां प्रधानदेवता अग्निः । वरः तत्र वधूं पाणौ गृहीत्वा अग्नेः परितः नयति। अतः एव विवाहः परिणयः इति उच्यते। वैवाहिकः अयम् अग्निः, दम्पतिभ्यां यावज्जीवं रक्षणीयः। तस्मिन् अग्नौ मन्त्रोच्चारणपूर्वकं मनुस्मृतेः काले विवाहस्य अष्टौ प्रकाराः प्रथिताः आसन् । तथा हि –

अष्टावेवे समासेन विवाह् धर्मतः स्मृताः इति महाभारतम्, आदिपर्वणि ७३.८

**चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् ।**
**अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत ।।मनुस्मृतिः ३.२०**

चतुर्णामपि वर्णानां इहलोकपारलोकयोः हिताहितविधाता विवाहः अष्टप्रकारः भवति । तद्यथा-

**बाह्यो दैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः ।**
**गान्धर्वो राक्षसश्चैव पैशाचाश्चाष्टमोऽधम इति मनुस्मृतिः ।३.२१**

ब्रह्मा-दैव-आर्ष-प्रजापत्य-आसुर-गान्धर्व-राक्षस-पैशाचाश्च एते अष्ट-प्रकारकाः विवाहाः प्रोक्ताः सन्ति। महाभारते अपि आदिपर्वणि एतेषाम् विवाहानाम् उल्लेखः दृश्यते।

**ब्रह्मविवाहः**

शास्त्रज्ञं सुशीलवरं सदनम् आहूय तस्य पूजनादिकं विधाय कन्यादानं यस्मिन् विवाहे क्रियते तस्य नाम ब्रह्म विवाहः इति । तद्यथा-

**आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम् ।**
**आहूय दानं कन्याया ब्रह्मो धर्मः प्रकीर्तितः ।। मनु.स्मृ.३.२७**

**दैवविवाहः-**

विवाहे अस्मिन् विशाले यज्ञे ऋत्विक्-ब्रह्मणाय विभूषणादिभिः सुशोभितायाः दानं क्रियते। उक्तं च मनुस्मृतौ –

**यमे तु वितते सम्यगृत्विजे कर्म कुर्वते ।**
**अलङ्कृत्य सुतादानं दैवं धर्म प्रचक्षते ।। मनुस्मृ.३.२८**

**आर्षविवाहः-**

एकं गोद्वयं वा यज्ञार्तं वरात् स्वीकृत्य यत् कन्यादानं क्रियते तस्य नाम एव आर्षविवाहः उच्यते । तद्यथा-

**एकं गोमिथुनं द्वे वा वरदायधर्मतः।**
**कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ।। मनुस्मृतिः,३.२९**

**प्रजापत्यविवाहः-**

अयं विवाहः अतीव सामान्यः भवति । अस्मिन् विवाहे सहेमौ चरताम् अर्थात् उभावपि धर्माचरणं सहेव कुरुताम् इति उक्त्वा कन्यायाः पूजनादिकं विधाय कन्यादानं क्रियते । उक्तं च –

**सहेमौ चरतां धर्ममिति वाचाऽनुभाष्य च ।**
**कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ।। मनुस्मृ,३.३०**

**आसुरविवाहः-**

वरस्य मातृपितृभ्यां कन्यायै च यथाशक्ति धनं प्रदाय स्वेच्छापूर्वकं यत् कन्यादानं विधीयते सः आसुरः विवाहः उच्यते । तद्यथा-

**ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।**
**कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ।।**

**गन्धर्वविवाहः-**

कन्यावरयोः इच्छापूर्वकं यः संयोगः भवति सः संयोगः गान्धर्वविवाहः उच्यते । अयं विवाहः कामवशभोगमात्रार्थः भवति न तु धर्मार्थः । उक्तं च –

**इच्छायान्योन्यसंयोगः कन्यायाश्च वरस्य च ।**
**गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भकः ।। मनु.३.३२**

**राक्षसविवाहः-**

ताडयित्वा छित्वा भित्त्वा च आक्रोशन्ती रुदती कन्या गृहात् बलपूर्वकं हत्वा नीयते सः विवाहः राक्षसविवाहः भवति । तद्यथा-

**हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ।**
**प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ।। मनुस्मृति, ३.३३**

**पिशाचविवाहः-**

सुप्तया मत्तया प्रमत्तया कन्यया सह एकान्ते सहवासः क्रियते । अयं पिशाचविवाहः इति उच्यते । अयं विवाहः अधमः पापपूर्णः विवाहः भवति । उक्तं च –

**सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।**
**स पापिष्ठो विवाहानां पैशाचष्टाधमोऽधमः ।।**
**मनुस्मृतिः ३.३४**

अनया विधया मनुना मनुस्मृतौ अष्टौ विवाहवधयः प्रोक्ताः सन्ति । आधुनिकहिन्दुसमाजे विवाहविच्छेदव्यवस्था-

विवाहविच्छेदविषये धर्मशास्त्रे विस्तृतं विवरणं नास्ति। द्वितीय-विवाहस्यावश्यकता विद्यते याज्ञवल्क्यस्मृतौ –

**सुरापी व्याधिता धूर्तौ वन्ध्यार्थघ्न्यप्रियम्बदा ।**
**स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ।।**

अर्थात् सुरापी, व्याधिता, धूर्ता, वन्ध्या, अर्थघ्नी, अप्रियम्वदा, स्त्रीप्रसू, पुरुषद्वेषिणी इत्यादिलक्षणयुक्तायाः स्त्रियः विद्यमाने पुरुषः द्वितीयविवाहं कर्तुं शक्नोति परन्तु प्रथमां स्त्रियं न त्यजेत्। कौटल्यार्थशास्त्रे तृतीयाधिकरणे विविाहविच्छेदोपरि किञ्चिदालोचना दृश्यते । यथा उभयोः पतिपत्न्योः इच्छया विच्छेदः भवति न तु एकस्य एकस्याः वा । स्त्रिया अपराधात् पुरुषः मोक्षमिच्छेत् चेत् नास्यै स्त्रियै स्त्रीधनं दद्यात् । एषा व्यवस्था तु अधर्मविवाहेषु नाम आसुर-गान्धर्व-राक्षस-पैशाचेषु भवति न तु धर्मविवाहेषु नाम ब्रह्मदैवार्षप्राजापत्येषु। यदुक्तं कौटिल्येन अमोक्षा भर्तुरकामस्य द्विषती भार्या भार्यायाश्च भर्ता। परस्परं दोषात् मोक्षः ।

आधुनिकहिन्दुविधिमध्ये हिन्दुविवाहविधि - विद्यते यत्र विवाह-विच्छेदोपरि विस्तृतं विवरणं दृश्यते। हिन्दुविवाहविधिस्तु पञ्चपञ्चाशदधिकैकोनविंशतितमे शतके प्रणयनमासीत् । यत्र त्रिंशत् धाराः सन्ति । तत्र त्रयोदशधारायां विवाहविच्छेदोपरि वर्णनं विद्यते, चतुर्दशधारायाम् उक्तमस्ति यत् विवाहस्य एकवर्षाभ्यान्तरे न्यायालये विच्छेदपत्रं न गृह्यते। पञ्चदशधारायामुक्तमस्ति विच्छेदावेदनं भविष्यति। विंशधारायामावेदनपत्रस्य विषयः सत्यपाठश्च विद्यते। एकविंशधारायां विच्छेदावेदनपत्रस्य अपरन्या-यालयं प्रति परिवर्तनक्षमता , आवेदनपत्रस्य विचारव्यवस्था तथा विषयगतसाक्ष्योपरि व्यवस्था दृश्यते। द्वाविंशतिधारायां कार्यप्रणाली चित्रोत्तोलनयन्त्रमाध्यमेन भविष्यति तथा तस्याः मुद्रणं प्रकाशनञ्च न भविश्यतीति विद्यते। त्रयोविंशधारायां कार्यप्रणाल्यामग्रतिः विद्यते ष। चतुर्विंशधारायां पुत्रकन्यनां तत्त्वावधानं सप्तविंशधारायां सम्प्रतिविनियोगः। अष्टविंशधारायां विच्छेदन्यायोपरिपुनरावेदनम् ऊनत्रिंशदारायां रक्षणमाणः, त्रिंशद्धाराया निरसनमानश्च विद्यते ।

आधुनिकहिन्दुविदौ त्रयोदशधारायां प्रतमे उक्तमस्ति विवाहदनन्तरं पत्युः पत्न्याः वा आवेदनेन विवाहविच्छेदः भविष्यति यदि प्रतिवादी विवाहादनन्तरं स्वेच्छया पतिः पत्नी वा अपरेण अपरया वा सह सम्पर्वंत्त स्थापयति, वलिवाहाद्परं निष्ठुरमाचरति, विच्छेदावेदनात्पूर्वं द्विवर्षं यावत् परित्यजति, धर्मान्तरितं भवति तथा असाध्यः चित्तवकृतिः भवतीति । द्वितीये उक्तमस्ति स्त्री अपि निम्नोक्तकारणदृष्ट्या न्यायालये विच्छेदावेदनं करष्यति । यदि –

**क.**एकस्याः जीवितायाः स्त्रियां विद्यमानायां पुरुष अपरविवाहं करोति, परन्तु अत्र ज्ञातव्यं यत् तत्र द्वे स्त्रियौ जीविते स्याताम् ।

**ख.**विवाहादन्तरं पुरुषः यदि बलात्कारादिदोषैः युक्तः स्यात् ।

**ग.**कस्मात् कारणवशात् स्त्री यदि अन्यत्र तिष्ठति। अपि च न्यायालयादेशानुसारं स्त्रियाः भरणपोषणं पत्युः कृते विद्यते परन्तु यदि वर्षमेकं यावत् तदुर्ध्वं वा उभयोः पतिपत्न्योः मेलनं न भवतीति । परन्तु त्रयोदशधारास्तु षट्सप्त्यधिकोनविंशशतके अष्टसप्तत्यधि-नियमद्वारा किञ्चित्परिवर्तनमभवत् यत् त्रयोदशधारा क मध्ये उक्तमस्ति । पतिः पत्नी वा अपरधर्मग्रहणे हिन्दुधर्मान्तरितं भवति । संसारत्यागी भवति तता सप्तवर्षाणि यावत् निरुद्धिष्टः निरुद्धिष्ठा वा भवति तर्हि तत्र न्यायिकविच्छेदः भविष्यति । त्रयोदशधारा खमध्ये उक्तमस्ति पतिपत्न्योः परस्रसम्मत्या विच्छेदः भविष्यति। षट्सप्तत्यधिकोनविंशतमे शतके संशोधितविवाहविध्यनुसारं पति-पत्न्योः परस्परसम्मत्या विवाहः विच्छेदः भविष्यति नाम यदि पतिपत्न्यौ वर्षमेकं तदुर्ध्वं वा मिलित्वा न तिष्ठतः, एकत्र चलनार्थमसमर्थौ तदा उभयोः सम्मत्या विच्छेदः भवतीति। एवं प्रकारेण मनस्मृतौ याज्ञवल्क्यस्मृतौ च विवाहसन्दर्भे उट्टङ्कितमस्ति।